'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 6th Semester Examination, 2023

## CC14-SANSKRIT

Time Allotted: 2 Hours　　　　Full Marks: 60

*The figures in the margin indicate full marks.*

( सर्वेषां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्यां देयम् )

### UNIT-I

1. अधोलिखितयोः एकस्योत्तरं प्रदेयम् –　　12×1 = 12

(क) कथं मन्त्रः पञ्चाङ्ग उच्यते ? कौटिल्यमतानुसारेण मन्त्रज्ञानस्य मन्त्ररक्षणस्य च प्रक्रिया आलोचनीया।

(ख) दूतप्रणिधिविषये कौटिल्यस्य मतं पर्यालोचयत।

2. वङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः (द्वयोः)　　3×2 = 6

(क) विद्याविनयहेतुरिन्द्रियजयः काम-क्रोध-लोभ –
मान – मद – हर्ष – त्यागात् कार्यः। कर्ण-त्वगक्षि
जिह्वा – घ्राणेन्द्रियाणां शब्द – स्पर्श – रूप – रस –
गन्धेष्वविप्रतिपत्तिरिन्द्रियजयः शास्त्रानुष्ठानं
वा। कृत्सं हि शास्त्रमिदमिन्द्रियजयः।

(ख) कृषिपशुपाल्ये वाणिज्या च वार्ता, धान्यपशुहिरण्यकुप्य विष्टिप्रदानादौपकारिकी । तया स्वपक्षं च वशीकरोति कोशदण्डाभ्याम्।

(ग) यावद्भ्यो गुह्यमाचष्टे जनेभ्यः पुरुषाधिपः।
अवशः कर्मणा तेन वश्यो भवति तावताम्॥

3. द्वयोः संक्षेपेण टीका लेख्या –　　6×2 = 12

लोकायतम्, योगक्षेमम् ; सत्री ; मात्स्यन्यायः।

### UNIT-II

4. एकस्योत्तरं प्रदेयम् –　　12×1 = 12

(क) भारतीये समाजे मानवधर्मशास्त्रस्य अवदानं सविशदम् आलोचयत।

(ख) राजनीतिशास्त्रेषु कौटिलीयार्थशास्त्रस्य महत्त्वं प्रतिपाद्यताम्।

5. द्वयोः टीका कार्या – 6×2 = 12

जीमूतवाहनः , नारदस्मृतिः , शुक्रनीतिसारः

6. संक्षिप्तमुत्तरं देयम् (द्वयोः) 3×2 = 6

(क) शतकत्रयं केन विरचितम् ? त्रयाणां शतकानां नामानि लिखत।

(ख) याज्ञवल्क्यसंहितायां कति अध्यायाः सन्ति ? तेषां नामानि लेखनीयानि।

(ग) मनुसंहितायाः टीकाकारसहितं टीकाद्वयम् उल्लिखत।

——×——